348sk24

२४
छन्दांसि

प्रस्तावना

संस्कृतजगति प्रायः सर्वत्र एव छन्दसः प्रयोगः भूयशः दृश्यते। श्लोकादिनिर्माणं तु छन्दः विना प्रायः नैव सम्भवति। छन्दसा रचितं पद्यम् अधिकं सौन्दर्यं विदधाति। अत एव छन्दोमयं संस्कृतजगत् इत्यत्र नास्ति सन्देहावसरः। काव्यनाटकादिलौकिकशास्त्रेषु छन्दसः प्रचुरं प्रयोगः दरीदृश्यते। न केवलं लौकिकसाहित्ये छन्दसः प्रयोगः विद्यते। अपि तु वैदिकसाहित्ये अपि छन्दसः भूयशः प्रयोगः दृश्यते। केवलं यजुर्वेदः एव गद्यमयः वर्तते। अवशिष्टं संहितात्रयं तु पद्यमयम् अस्ति। सामवेदे अर्थववेदे ऋग्वेदे च त्रिष्टुभादिना छन्दसा एव मन्त्राः विरचिताः सन्ति। छन्दःसहितमन्त्रः अधिककालपर्यन्तं स्मरणे तिष्ठन् सौन्दर्यं विधत्ते। प्राचीनशास्त्राकारैः वेदान्तादिशास्त्रग्रन्थाः अपि अनुष्टुभादिना छन्दसा एव रचिताः आसन्। संस्कृतजगति सर्वप्रथमं तु पद्यमयम् एव सर्वम् आसीत्। लौकिककाव्यादिषु अपि लौकिकछन्दसः प्रयोगः दृश्यते। वसन्ततिलकादिना छन्दसा एव रचितः श्लोकः अधिकः मनोग्राही भवति। कालिदासादयः महाकवयस्तु छन्दसा पद्यनिर्माणे अतीव पटवः आसन्। केचन कवयस्तु किञ्चित् एकं छन्दः समाश्रित्य सम्पूर्णं ग्रन्थं रचितवन्तः। अत एव छन्दः विना संस्कृतजगत् अन्धकारमयम् अस्ति। अतः संस्कृतजगति छन्दसः नितराम् आवश्यकता अनुभूयते। प्रकृतपाठे अस्मिन् केषाञ्चित् प्रसिद्धानां छन्दसां लक्षणानि उदाहरणानि च आलोच्यन्ते।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

१. विविधानां छन्दसां लक्षणं ज्ञास्यति।
२. छन्दसाम् उदाहरणानि ज्ञास्यति।
३. लक्षणस्य छन्दउदाहरणेषु समन्वयं ज्ञास्यति।
४. काव्येषु विविधेषु स्थलेषु श्लोकानां छन्दोनिर्णयं कर्तुं प्रभवेत्।
५. स्वयम् एतैः छन्दोभिः श्लोकरचने योग्यो भवेत्।
६. छन्दसां भेदोपभेदज्ञानं भवेत्।

२४.१) मात्रिकच्छन्दांसि

मात्रिकच्छन्दः इत्युक्ते मात्राम् आश्रित्य एव गणाः भवन्ति। प्रति गणं चतस्रः मात्राः वर्तन्ते। अस्मिन् छन्दसि मात्रायाः माहात्म्यम् अधिकं दृश्यते। अत्र अक्षरम् आश्रित्य गणाः न भवन्ति। अत्रापि मात्रिकच्छन्दःसु केवलम् आर्याच्छन्दसः वर्णनं कृतम्।

२४.१.१) आर्याच्छन्दः

इदम् आर्याच्छन्दः मात्रिकच्छन्दः अस्ति। अर्थात् मात्राम् आधारीकृत्यैव गणस्य गणना भवति। प्रत्येकं गणेषु चतस्रः मात्राः भवन्ति। चतस्रः मात्राः सन्ति चेत् एव एकः गणः भवति।

आर्यासामान्यलक्षणम् - आर्याछन्दसः लक्षणम् -

"लक्ष्मैतत्सप्त गणा गोपेता भवति नेह विषमे जः।

षष्ठोऽयं नलघू वा प्रथमेऽर्धे नियतमार्यायाः॥

षष्ठे द्वितीयलात्परके न्ले मुखलाच्च सयतिपदनियमः।

चरमेऽर्धे पञ्चमके तस्मादिह भवति षष्ठो लः॥" इति।

अन्वयः- आर्यायाः प्रथमे अर्धे एतत् लक्ष्म नियतम् (अस्ति) गोपेताः सप्त गणाः (भवन्ति), इह विषमे जः न भवति, षष्ठः अयम् (जः भवति), वा नलघू (भवतः)। च षष्ठे न्ले द्वितीयलात् (पूर्वम्) परके (न्ले) मुखलात् (पूर्वम्) सयतिपदनियमः। चरमे अर्धे (एतत् लक्ष्म नियतम्) पञ्चमके (न्ले) तस्मात् (सयतिपदनियमः), इह षष्ठो लः भवति।

व्याख्यानम् - आर्याच्छन्दसः प्रथमार्धे प्रथमद्वितीययोः चरणयोः एतत् उच्यमानं लक्ष्म (लक्षणम्) निश्चितम् अस्ति। किं तत् लक्षणम्। तदा उच्यते - गुरुणा सहिताः सप्त संख्याकाः गणाः सन्ति। अस्याम् आर्यायां विषमे गणे (प्रथम-तृतीय-पञ्चम-सप्तमरूपे गणे) जगणः (मध्यगुरुः) न वर्तते। षष्ठस्थानवर्ती जगणः भवति। अथवा षष्ठे नगणेन साकं एकः लघुस्वरः वर्तते।

अधुना यतिनियमं कथयति - यदि षष्ठस्थानके गणे लघुस्वरेण साकं नगणः वर्तते तर्हि षष्ठस्थानके गणे चत्वारि लघुसंज्ञायुक्तानि अक्षराणि भवन्ति। तत्र चतुर्लघुरूपस्य षष्ठगणस्य तु द्वितीयलघोः पूर्वम् अर्थात् प्रथमलघौ यतिः भवति। एवञ्च षष्ठगणस्य प्रथमलघौ एव पदस्य समाप्तिः भवति। पुनश्च यदि सप्तमस्थानके गणे अपि चत्वारि लघुसंज्ञायुक्तानि अक्षराणि भवन्ति चेत् चतुर्लघुरूपस्य सप्तमगणस्य प्रथमात् लघोः पूर्वम् अर्थात् षष्ठगणस्य अन्तिमे अक्षरे यतिः पदसमाप्तिश्च भवति। सयतिः इति शब्दस्य अर्थः यतिः पदसमाप्तिश्च कार्यद्वयं भवति। एतावत् पूर्वार्धलक्षणं यतिपदनियमसहितम् आलोचितम्।

सम्प्रति द्वितीयार्धस्य लक्षणं कथयति - उत्तरार्धे तृतीयचतुर्थपादयोः पञ्चमस्थानके गणे चत्वारि लघुसंज्ञायुक्तानि अक्षराणि विद्यन्ते चेत् पञ्चमगणस्य प्रथमात् लघोः पूर्वम् अर्थात् चतुर्थगणस्य अन्तिमे अक्षरे यतिः पदसमाप्तिश्च भवेत्। पुनश्च षष्ठस्थानवर्ती गणः एकलघुरूपः भवति। षष्ठगणस्य एकलघुरूपता एव उत्तरार्धस्य पूर्वार्धात् विशेषता, अवशिष्टं सर्वं तु पूर्वार्धवत् भविष्यति। तदित्थं पूर्वार्धे

त्रिंशन्मात्राः, उत्तरार्धे च सप्तविंशतिः इति फलितम्। इदम् आर्याच्छन्दः मात्रिकेषु विषमवृत्तम्। प्रति चरणं भिन्नसंख्यायुक्तानि अक्षराणि विद्यन्ते।

उदाहरणम्- आर्याच्छन्दसः उदाहरणम् -

।।।। ,। ऽ। , ऽ ऽ, / ऽ।। , ऽऽ ,।।।। ,।। ऽ , ऽ

सुभगस-लिलाव-गाहा/ पाटल-संस -र्गसुरभि-वनवा-ताः।

ऽ ऽ , ।।।। , ऽ ऽ , /।। ऽ, ।। ऽ ,। ,।। ऽ , ऽ

प्रच्छा-यसुलभ-निद्रा/- दिवसाः- परिणा-म-रमणी-याः॥

उदाहरणे लक्षणसमन्वयः - प्रथमार्धस्य प्रथमद्वितीयचरणयोः अन्तःस्थितेन गुरुवर्णेन सह सप्त गणाः विद्यन्ते। एवञ्च विषमे गणे (प्रथमे तृतीये पञ्चमे सप्तमे च) जगणः न विद्यते। षष्ठे तु लघुस्वरेण सह नगणः वर्तते। अर्थात् षष्ठस्थानके चत्वारि लघुसंज्ञायुक्तानि अक्षराणि सन्ति। अत एव चतुर्लघुरूपस्य षष्ठगणस्य द्वितीयलघोः (सु इत्यस्य) पूर्वम् अर्थात् प्रथमलघौ (ग इत्यस्मिन्) यतिः भवति। एवञ्च षष्ठगणस्य प्रथमलघौ गकारे एव पदस्य समाप्तिः भवति। एवञ्च उत्तरार्धस्य अपि तृतीयचतुर्थचरणयोः अन्तःस्थितेन गुरुवर्णेन साकं सप्त गणाः विद्यन्ते। उत्तरार्धस्य अपि विषमे गणे (प्रथमे तृतीये पञ्चमे सप्तमे च) जगणः न विद्यते। षष्ठस्थानके गणे एकलघुरूपता विद्यते। सम्प्रति उत्तरार्धस्य यतिनियमं वक्ष्यामः। पञ्चमस्थानके तु चत्वारि लघुसंज्ञायुक्तानि अक्षराणि न विद्यन्ते। अतः प्रकृतश्लोके लक्षणोक्तयतिनियमः तु न प्रवर्तते। प्रकृतश्लोके पूर्वार्धे त्रिंशन्मात्राः, उत्तरार्धे च सप्तविंशतिः मात्राः वर्तन्ते। इदम् आर्याच्छन्दः मात्रिकेषु विषमवृत्तम्। प्रति चरणं भिन्नसंख्यायुक्तानि अक्षराणि विद्यन्ते।

पाठगतप्रश्नाः-१

अत्र केचित् पाठगतप्रश्नाः प्रदीयन्ते -

१. आर्याच्छन्दः मात्रिकच्छन्दः उत वार्णिकच्छन्दः।

२. आर्याच्छन्दसः विषमे गणे कः गणः न वर्तते।

३. आर्याच्छन्दः मात्रिकेषु समवृत्तं विषमवृत्तं वा।

४. आर्याच्छन्दसा निर्मितस्य श्लोकस्य पूर्वार्धे कति मात्राः सन्ति।

५. आर्याच्छन्दसा निर्मितस्य श्लोकस्य उत्तरार्धे कति मात्राः सन्ति।

२४.२) वार्णिकच्छन्दांसि

मात्रिकच्छन्दांसि वर्णयित्वा सम्प्रति वार्णिकच्छन्दांसि वर्ण्यन्ते। अत्र तु गणनिर्माणं वर्णं समाश्रित्य भवति न तु मात्राम्। प्रत्येकं गणेषु त्रीणि अक्षराणि भवन्ति। तत्रापि प्रकृतपाठे अस्माभिः केवलं वार्णिकच्छन्दःसु केवलं समवृत्तच्छन्दसः चर्चा विधीयते। समवृत्तं नाम प्रति चरणं समलक्षणं समानम्

अक्षरं च वर्तते। अर्थात्प्रति चरणं सम्पूर्णं समानं भवति। पुनश्च पाठवृद्धिभयात् अर्धसमवृत्तस्य विषमवृत्तस्य च आलोचना न वर्तते।

२४.२.१) इन्द्रवज्रा

अनुष्टुप्-छन्दसा एव अधिकानि पद्यानि रचितानि इति नास्ति सन्देहावसरः। तथापि अनुष्टुभं विहाय अधिकानि पद्यानि तु इन्द्रवज्राच्छन्दसा एव रचितानि दरीदृश्यन्ते। अनेन छन्दसा श्लोकनिर्माणम् अत्यन्तं सरलम् अस्ति। पुनश्च वृत्तम् इदं श्रोतुः कर्णमाधुर्यं जनयति। अत एव कवयः भूयशः अनेन छन्दसा श्लोकान् रचयन्ति स्म।

लक्षणम् - इन्द्रवज्राच्छन्दसः लक्षणम्- "स्यादिन्द्रवज्रा यदि तौ जगौ गः" इति।

व्याख्यानम् - त्रिष्टुभः छन्दसः कश्चित् भागः अयम् इन्द्रवज्रा। समवृत्तं छन्दः इदम् अस्ति। यतो हि चतुर्षु पादेषु एव समानानि अक्षराणि समलक्षणानि च भवन्ति। प्रति चरणं तौ इत्युक्ते तगणद्वयम्, जगौ इत्युक्ते जगणेन साकं गुरुद्वयं च भवति।

उदाहरणे लक्षणसमन्वयः - अत्र इन्द्रवज्राच्छन्दसः यत् लक्षणं प्रोक्तं तदेव अस्य छन्दसः उदाहरणम् अपि विद्यते। सम्प्रति उदाहरणान्तरं प्रदर्श्यते -

ऽ ऽ ।, ऽ ऽ। ,। ऽ। , ऽ ऽ / ऽ ऽ। ,ऽ ऽ। ,। ऽ। , ऽ ऽ

गोष्ठे गि-रिं सव्य-करेण- धृत्वा /रुष्टेन्द्र-वज्राह-मिमुक्तवृष्टौ।

ऽ ऽ ।, ऽ ऽ। ,। ऽ ।, ऽ ऽ / ऽ ऽ ।, ऽ ऽ। ,। ऽ। , ऽ ऽ

यो गोकु-लं गोप-कुलं च- सुस्थं, चक्रे स- नो रक्षतु चक्र-पाणिः॥

अस्य प्रकृतश्लोकस्य चतुर्षु अपि प्रत्येकं चरणेषु क्रमशः तगणद्वयम्, एकः जगणः, गुरुवर्णद्वयं च वर्तते। अत एव इन्द्रवज्राछन्दसः उदाहरणम् इदं विद्यते। अक्षरसंख्याम् आश्रित्य एव गणनिर्धारणं क्रियते। प्रत्येकं गणेषु त्रीणि अक्षराणि वर्तन्ते। उदाहरणे अस्मिन् प्रति चरणं क्रमेण तगणः, तगणः, जगणः, गुरुवर्णद्वयं वर्तते। तथैव प्रति चरणं समगणः समक्रमश्च विद्यते। एवञ्च प्रति चरणम् एकादश अक्षराणि सन्ति। अस्य छन्दसः पादान्ते यतिः भवति। यतिः हि विरामः इति।

२४.२.२) उपेन्द्रवज्रा

लक्षणम् - उपेन्द्रवज्राच्छन्दसः लक्षणम् - "उपेन्द्रवज्रा जतजास्ततो गौ"इति।

व्याख्यानम् - उपेन्द्रवज्रा त्रिष्टुभः कश्चित् भेदः। अस्य वृत्तस्य जतजाः इत्युक्ते क्रमशः जगणः, तगणः, जगणः च वर्तन्ते। ततःपरं द्वौ गुरू च स्याताम् इति। तद् वृत्तम् उपेन्द्रवज्रा। अर्थात् उपेन्द्रवज्रावृत्ते प्रति चरणं क्रमशः जगणः, तगणः, जगणः च वर्तते। ततःपरं परं गुरुस्वरविशिष्टाक्षरद्वयं वर्तते। एवञ्च पादस्य अन्ते एव यतिः भवति।

उदाहरणे लक्षणसमन्वयः - उदाहरणं हि -

। ऽ ।, ऽ ऽ। ,। ऽ। , ऽ ऽ/ । ऽ। , ऽ ऽ ।,। ऽ ।,ऽ ऽ

जिता ज-गत्येष- भवभ्र-मस्तै/-र्गुरूदि-तं ये गि-रिशं स्म-रन्ति।

। ऽ । , ऽ ऽ। ,। ऽ। , ऽ ऽ/ । ऽ। , ऽ ऽ। ,। ऽ। ,ऽ ऽ

उपास्य-मानं क-मलास-नाद्यै/-रुपेन्द्र-वज्रायु-धवारि-नाथैः॥ इति।

उपेन्द्रवज्रानामके छन्दसि प्रति चरणं क्रमशः जगणः, तगणः, जगणः च वर्तते। ततःपरं गुरुवर्णद्वयं विलसति। प्रकृतश्लोके अपि तथैव प्रथमं जगणः ततःपरं तगणः ततःपरं जगणश्च वर्तते। ततःपरं गुरुवर्णद्वयं विलसति। एवञ्च प्रति चरणं एकादश अक्षराणि सन्ति। पुनश्च पादान्ते यतिः सम्भवति। अत एव उपेन्द्रवज्राच्छन्दसः उदाहरणत्वेन अयं श्लोकः गृहीतो भवति।

२४.२.३) शालिनी

लक्षणम्- शालिनीवृत्तस्य लक्षणम् - "शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः" इति।

व्याख्यानम् - शालिनी त्रिष्टुभ्भेदः। यस्य वृत्तस्यप्रति चरणं म्तौ - मगणतगणौ, तगौ- तगणगुरू, गः - गश्च भवति। अब्धिभिः नाम चतुर्भिः। लोकैः नाम सप्तभिः इति। अर्थात् शालिनीच्छन्दसःप्रति चरणं क्रमेण मगणः, तगणः, पुनः तगणः, गुरुवर्णः, ततःपरं पुनः गुरुवर्णः भवति चेत् तस्य वृत्तस्य शालिनीवृत्तम् इति नाम भवति। चतुर्भ्यः अक्षरेभ्यः परं ततः सप्तभ्यः अक्षरेभ्यः परं च यतिः भवति। यतिः इत्युक्ते विरामो भवति।

उदाहरणे लक्षणसमन्वयः - शालिनीच्छन्दसः उदाहरणं तावत् -

ऽ ऽ ऽ, ऽ ऽ। , ऽ ऽ । , ऽ ऽ / ऽ ऽ ऽ, ऽ ऽ। , ऽ ऽ। , ऽ ऽ

अंहो ह-न्ति ज्ञान-वृद्धिं वि-धत्ते/, धर्मं द-त्ते, काम-मर्थं च- सूते।

ऽ ऽ ऽ, ऽ ऽ। , ऽ ऽ । , ऽ ऽ / ऽ ऽ ऽ, ऽ ऽ। , ऽ ऽ। , ऽ ऽ

मुक्तिं द-त्ते सर्व-दोपास्य-माना, पुंसां श्र-द्धाशालि-नी विष्णु-भक्तिः॥

अस्मिन् श्लोके प्रति चरणम् एकादश अक्षराणि विद्यन्ते। एवञ्च प्रकृतश्लोकस्य अस्य आदौ मगणः ततःपरं तगणः ततश्च पुनः तगणः ततःपरं गुरुवर्णद्वयं वर्तते। एवञ्च चतुर्भ्यः अक्षरेभ्यः परं ततः सप्तभ्यः अक्षरेभ्यः परं च यतिः विद्यते। इदम् एव लक्षणं चतुर्षु चरणेषु च उपलभ्यते। अत एव श्लोकोऽयं शालिनीच्छन्दसः उदाहरणं भवति।

पाठगतप्रश्नाः-२

अत्र केचित् पाठगतप्रश्नाः प्रदीयन्ते -

६. इन्द्रवज्रावृत्तस्य लक्षणं किम्।

७. इन्द्रवज्रावृत्तस्य एकस्मिन् पादे कति अक्षराणि सन्ति।

८. इन्द्रवज्रावृत्तं समवृत्तं विषमवृत्तं वा।

९. उपेन्द्रवज्रावृत्तस्य लक्षणं किम्।

१०. उपेन्द्रवज्रावृत्तस्य एकस्मिन् पादे कति अक्षराणि सन्ति।

११. शालिनीवृत्तस्य लक्षणं किम्।

१२. शालिनीवृत्तस्य एकस्मिन् पादे कति अक्षराणि सन्ति।

२४.२.४) रथोद्धता

लक्षणम्- रथोद्धतावृत्तस्य लक्षणम् -“रान्नराविह रथोद्धता लगौ”इति।

व्याख्यानम् - त्रिष्टुभः छन्दसः कश्चित् रथोद्धतानामकः भेदः वर्तते। यस्य वृत्तस्य पादे रात् (रगणात्) नरौ (नगणरगणौ), लगौ (लघुगुरू) च स्याताम् चेत् तत् वृत्तं रथोद्धता इति नाम्ना प्रख्यातं भवेत्। अत्र तु पादान्ते यतिव्यवस्था विद्यते। रथोद्धताच्छन्दसः प्रति पादं रगणात् परं नगणः ततःपरं पुनः रगणश्च वर्तते। एवञ्च लघुगरू च स्याताम्। एवञ्च पादस्य अन्ते एव यतिनियमो भवति।

उदाहरणे लक्षणसमन्वयः - रथोद्धताच्छन्दसः उदाहरणं तावत् -

ऽ ।ऽ,।।। , ऽ।ऽ,।ऽ/ ऽ।ऽ, ।।। , ऽ।ऽ, ।ऽ

किं त्वया- सुभट- दूरव-र्जितं, नात्मनो- न सुहृ-दां प्रियं- कृतम्।

ऽ।ऽ,।।। , ऽ।ऽ, ।ऽ/ ऽ।ऽ,।।। , ऽ।ऽ, ।ऽ

यत्पला-यनप-रायण-स्य ते, याति धू-लिरधु-ना रथो-द्धता॥ इति।

प्रकृतश्लोकस्य अस्य प्रत्येकं चरणेषु रगणात् परं नगणः अस्ति, ततःपरं पुनः रगणः विद्यते, ततःपरम् एकः लघुः एकः गुरुश्च विद्यन्ते। एवञ्च प्रकृतश्लोकस्य अस्य पादान्ते एव यतिः विद्यते। प्रकृतलक्षणेन साकं श्लोकः अयम् अन्वेति। अत एव श्लोकः अयं रथोद्धताच्छन्दसः उदाहरणत्वेन गृहीतो भवति। प्रथमचरणवत् अवशिष्टं चरणम् अपि तथा लक्षणयुक्तं विद्यते। रथोद्धता त्रिष्टुभः कश्चित् भागः अस्ति। अतः अस्य श्लोकस्य प्रत्येकं चरणेषु एकादश अक्षराणि विद्यन्ते। अर्थात् पादचतुष्टयम् आधारीकृत्य चतुश्चत्वारिंशत् अक्षराणि विलसन्ति।

२४.२.५) वंशस्थम्

संस्कृतसाहित्यजगति वंशस्थछन्दसः प्रचुरं प्रयोगः दृश्यते। एवञ्च छन्दः इदम् अत्यन्तं लोकप्रसिद्धं विद्यते। कालिदासादयः वंशस्थछन्दसा एव बहूनि पद्यानि रचितवन्तः आसन्। अनेन छन्दसा रचिताः श्लोकाः अधिकं चमत्कारं जनयन्ति।

लक्षणम्- वंशस्थच्छन्दसः लक्षणं कथयति - “जतौ तु वंशस्थमुदीरितं जरौ”इति।

व्याख्यानम् - जगतीच्छन्दसः कश्चन भागः वंशस्थवृत्तं भवति। यस्य वृत्तस्य प्रति पादं जतौ- जगणतगणौ भवतः, पुनश्च जरौ- जगणरगणौ च भवतः चेत् तत् वृत्तं वंशस्थम् इति नाम्ना प्रथितं भवति।

अर्थात् यस्य वृत्तस्य प्रति पादं क्रमेण जगणः, तगणः,ततश्च पुनः जगणः, ततःपरं रगणः च वर्तन्ते चेत् तद् वंशस्थम् इति नाम्ना ख्यातं भवति। छन्दः इदं समवृत्तम् अस्ति। अत एव पादचतुष्टयम् अपि समलक्षणयुक्तं भवति एव। अस्य छन्दसः एकस्मिन् पादे द्वादश अक्षराणि विद्यन्ते। अतः पादचतुष्टयम् आहृत्य अष्टचत्वारिंशत् अक्षराणि भवन्ति। अस्य वृत्तस्य पादान्ते एव यतिः भवति।

उदाहरणे लक्षणसमन्वयः - वंशस्थछन्दसः उदाहरणं तावत्-

।ऽ ।, ऽ ऽ।,।ऽ।, ऽ।ऽ/।ऽ।, ऽ ऽ।,।ऽ।, ऽ।ऽ

नमोऽस्त्व-नन्ताय- सहस्र-मूर्तये-/ सहस्र-पादाक्षि-शिरोरु-बाहवे।

।ऽ।, ऽ ऽ।,।ऽ।, ऽ।ऽ/ ।ऽ।, ऽ ऽ।,।ऽ।, ऽ।ऽ

सहस्र-नाम्ने पु-रुषाय- शाश्वते-/, सहस्र-कोटीयु-गधारि-णे नमः॥

प्रकृतश्लोकस्य अस्य प्रत्येकं पादेषु आदौ जगणः वर्तते, ततःपरं तगणः विद्यते, ततःपरं पुनः जगणः, ततःपरं रगणः क्रमेण वर्तन्ते। अत एव वंशस्थवृत्तस्य उदाहरणम् इदम् अस्ति। वंशस्थं समवृत्तम् अस्ति। अतः पादचतुष्टये अपि इदम् एव लक्षणं विद्यते। अत्र एकस्मिन् पादे एव द्वादश अक्षराणि सन्ति। पादचतुष्टयम् आहृत्य अष्टचत्वारिंशत् अक्षराणि विद्यन्ते। पादस्य अन्ते एव यतिः भवति। अत एव वंशस्थच्छन्दसः उदाहरणम् एतत् विद्यते।

२४.२.६) तोटकम्

संस्कृतजगति तोटकवृत्तस्य अत्यन्तं प्रसिद्धिः विद्यते। इदं च वृत्तं कवीनाम् अत्यन्तं प्रियं विद्यते।

लक्षणम्- तोटकवृत्तस्य लक्षणं प्रोच्यते - “ इह तोटकमम्बुधिसैः प्रथितम्” इति।

व्याख्यानम् - तोटकवृत्तं जगत्याः कश्चित् भागः वर्तते। इदं वृत्तं समवृत्ते अन्तर्गतम् अस्ति। छन्दःशास्त्रे अम्बुधिः इत्युक्ते चत्वारः इत्यवगम्यते। इह – छन्दःशास्त्रे अम्बुधिसैः - चतुर्भिः सगणैः युक्तं भवति चेत् तोटकम् इति नाम्ना प्रख्यातं भवेत्। यस्य च वृत्तस्य प्रति पादं चत्वारः सगणाः वर्तन्ते चेत् तत् वृत्तं तोटकम् इति नाम्ना प्रथितम् अस्ति। तोटकवृत्तस्य पादान्ते यतिः भविष्यति। अस्य वृत्तस्य पादचतुष्टयम् एव समलक्षणघटितं भवेत्। अस्य वृत्तस्य एकस्मिन् पादे द्वादश अक्षराणि वर्तन्ते। पादचतुष्टयम् आहृत्य अष्टचत्वारिंशत् अक्षराणि विद्यन्ते।

उदाहरणे लक्षणसमन्वयः - तोटकवृत्तस्य उदाहरणं तावत्-

।। ऽ,।। ऽ, ।। ऽ,।। ऽ/।। ऽ,।। ऽ, ।। ऽ,।। ऽ

जय रा-म सदा- सुखधा-म हरे/ रघुना-यक सा-यक चा-प धरे।

।। ऽ,।। ऽ,।। ऽ,।। ऽ/ ।। ऽ,।। ऽ, ।। ऽ,।। ऽ

भववा-रणदा-रणसिं-ह प्रभो/ गुणसा-गर ना-गर ना-थ विभो॥

प्रकृतश्लोकस्य अस्य प्रति पादं सगणचतुष्टयं विद्यते। एवञ्च पादचतुष्टयम् एव समानलक्षणयुक्तं विद्यते। यतो हि समवृत्तं वर्तते। एवञ्च अस्य वृत्तस्य एकस्मिन् पादे द्वादश अक्षराणि विद्यन्ते। यतो हि एकस्मिन् पादे चत्वारः गणाः वर्तन्ते। एकस्मिन् गणे च त्रीणि अक्षराणि विद्यन्ते। पादचतुष्टयं समाहृत्य अष्टचत्वारिंशत् अक्षराणि सन्ति। पादस्य अन्ते एव यतिः भवति। यतिः इत्युक्ते विरामः। इदं छन्दः तु वार्णिकच्छन्दः वर्तते।

२४.२.७) द्रुतविलम्बितम्

संस्कृतसाहित्यजगति द्रुतविलम्बितवृत्तम् अत्यन्तं प्रसिद्धं वर्तते। कालिदासादयः महाकवयः द्रुतविलम्बितं वृत्तं समाश्रित्य एव बहून् श्लोकान् रचितवन्तः आसन्। इदं च समवृत्तं विद्यते। इदं च वृत्तं श्रोतुः अत्यन्तं कर्णमाधुर्यं जनयति।

लक्षणम् - तथाहि द्रुतविलम्बितवृत्तस्य लक्षणम् - "द्रुतविलम्बितमाह नभौ भरौ"इति।

व्याख्यानम् - इदं च वृत्तं जगत्याः कश्चित् भागः विद्यते। अत एव इदं समवृत्तं विद्यते। यस्य वृत्तस्य प्रत्येकं पादेषु नभौ - नगणः, भगणः च भवति, पुनश्च भरौ - भगणः रगणः च वर्तते चेत् तत् वृत्तं द्रुतविलम्बितम् इति नाम्ना प्रख्यातं भवति। अर्थात् यस्य वृत्तस्य प्रति पदं क्रमेण नगणः , भगणः, भगणः, रगणः भवति चेत् तत् वृत्तं द्रुतविलम्बितम् इति नाम्ना काव्यजगति प्रथितं भवति। इदं समवृत्तं विद्यते। अत एव पादचतुष्टयम् अपि समलक्षणयुक्तं भवति। एवञ्च अस्य वृत्तस्य एकस्मिन् पादे द्वादश अक्षराणि विद्यन्ते। यतो हि एकस्मिन् पादे चत्वारः गणाः वर्तन्ते। एकस्मिन् गणे च त्रीणि अक्षराणि विद्यन्ते। पादचतुष्टयं समाहृत्य अष्टचत्वारिंशत् अक्षराणि सन्ति। पादस्य अन्ते एव यतिः भवति। यतिः इत्युक्ते विरामः। इदं छन्दः तु वार्णिकच्छन्दः वर्तते।

उदाहरणे लक्षणसमन्वयः - द्रुतविलम्बितवृत्तस्य उदाहरणं तावत्-

||| , ऽ || , ऽ || , ऽ| ऽ/||| , ऽ|| , ऽ || , ऽ| ऽ

द्रुतग-तिः पुरु-षो धनभाजनं, भवति- मन्दग-तिश्च सु-खोचितः।

||| , ऽ || , ऽ|| , ऽ| ऽ/ ||| , ऽ|| , ऽ|| , ऽ| ऽ

द्रुतवि-लम्बित-खेलग-तिर्नृपः, सकल-राज्यसु-खं प्रिय-मश्नुते॥ इति।

प्रकृतश्लोकस्य अस्य प्रत्येकं पादेषु आदौ नगणः अस्ति, ततःपरं भगणः विद्यते, ततःपरं पुनः भगणः विद्यते, ततःपरं रगणः विद्यते। अत एव श्लोकः अयं द्रुतविलम्बितस्य उदाहरणत्वेन गृहीतो भवति। इदं तु समवृत्तं वर्तते। एवञ्च श्लोकस्य अस्यप्रति चरणं चत्वारः गणाः विद्यन्ते। प्रतिगणं त्रीणि अक्षराणि विद्यन्ते। एवञ्च अस्य श्लोकस्य एकस्मिन् पादे द्वादश अक्षराणि विद्यन्ते। प्रकृतश्लोकस्य पादचतुष्टयं समाहृत्य अष्टचत्वारिंशत् अक्षराणि सन्ति। पादस्य अन्ते एव यतिः भवति। यतिः इत्युक्ते विरामः। इदं छन्दः तु वार्णिकच्छन्दः वर्तते। छन्दः इदम् अत्यन्तं सुन्दरमयं वर्तते। अत एव द्रुतविलम्बितवृत्तस्य अपरं नाम सुन्दरी इति। एवञ्च श्रूयते- "पादान्ते यतिः। अस्यैव 'सुन्दरी' इति नामान्तरम्"इति।

द्रुतविलम्बितस्य उदाहरणान्तरं विद्यते -

इतरपापफलानि यदृच्छया, वितर तानि सहे चतुरानन।

अरसिकेषु कवित्वनिवेदनं, शिरसि मा लिख मा लिख मा लिख॥ इति।

प्रकृतश्लोकस्य द्वितीयचतुर्थपादयोः अन्तिमम् अक्षरं लघुस्वरयुक्तम् अस्ति। परन्तु द्रुतविलम्बितच्छन्दसः तु अन्तिमः गणः भवति रगणः। तस्य तु ऽ। ऽ इति आकृतिः विद्यते। अर्थात् रगणस्य अन्तिमम् अक्षरं गुरुस्वरयुक्तं भवति। अत एव प्रकृतश्लोकस्य द्वितीयचतुर्थयोः पादयोः अन्तिमे अक्षरे गुरुस्वरः नास्ति। अतः प्रकृतश्लोकः अयम् द्रुतविलम्बितस्य उदाहरणत्वेन गण्यः कथं भवति। अस्य उत्तरं तु पादान्ते छन्दःपूरणाय प्रयोजनवशात् लघोः वर्णस्य गुरुत्वेन अपि स्वीकारः भवति। अर्थात् छन्दःपूरणाय लघुगुरुविपरिणामस्तु भवति एव। अत एव प्रकृतश्लोके अपि छन्दःपूरणाय पादान्तस्य वर्णस्य गुरुत्वेन ग्रहणं भवति। अत एव प्रकृतश्लोकः अयं द्रुतविलम्बितवृत्तस्य अपि उदाहरणं भवति।

पाठगतप्रश्नाः -३

अत्र केचित् पाठगतप्रश्नाः प्रदीयन्ते -

१३. रथोद्धतावृत्तस्य लक्षणं किम् अस्ति।
१४. रथोद्धतावृत्तेन रचिते पूर्णश्लोके कति अक्षराणि विद्यन्ते।
१५. रथोद्धतावृत्तस्य यतिः कुत्र भवति।
१६. वंशस्थवृत्तस्य लक्षणं किम्।
१७. वंशस्थवृत्तस्य प्रत्येकं चरणेषु कति अक्षराणि सन्ति।
१८. तोटकवृत्तस्य लक्षणं किम्।
१९. तोटकवृत्तस्य प्रत्येकं चरणेषु कति अक्षराणि सन्ति।
२०. द्रुतविलम्बितवृत्तस्य लक्षणं किम्।
२१. द्रुतविलम्बितवृत्तस्य यतिः कुत्र भवति।
२२. द्रुतविलम्बितवृत्तस्य अपरं नाम किम्।

२४.२.८) भुजङ्गप्रयातम्

काव्यमार्गे इदं वृत्तम् अत्यन्तं लोकप्रियं विद्यते। यतो हि अनेन वृत्तेन श्लोकरचना अत्यन्तं सरला भवति। पुनश्च अस्मिन् वृत्ते समगणः वर्तते। अत एव श्रुतिमाधुर्यम् अपि अधिकतया अनुभूयते। सरलतया सुन्दरश्लोकनिर्माणाय महाकवयः इदम् एव वृत्तम् आश्रितवन्तः। सम्प्रति तस्य वृत्तस्य लक्षणादिकं चर्च्यते।

लक्षणम् - भुजङ्गप्रयातस्य लक्षणं तावत् - “भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः। ”इति।

व्याख्यानम् - इदं वृत्तं जगत्याः कश्चित् भागः वर्तते। यस्य वृत्तस्यप्रति चरणं चतुर्भिः यगणैः युक्तं स्यात्, तस्य वृत्तस्य भुजङ्गप्रयातम् इति नाम्ना प्रख्यातम्। अर्थात् भुजङ्गप्रयातस्य वृत्तस्य प्रति चरणं चत्वारः यगणाः भवन्ति। एवञ्च अस्य वृत्तस्य पादान्ते एव यतिः भवति। इदं समवृत्तं विद्यते। अत एव पादचतुष्टयम् अपि समलक्षणयुक्तं भवति। एवञ्च अस्य वृत्तस्य एकस्मिन् पादे द्वादश अक्षराणि विद्यन्ते। यतो हि एकस्मिन् पादे चत्वारः गणाः वर्तन्ते। एकस्मिन् गणे च त्रीणि अक्षराणि विद्यन्ते। पादचतुष्टयं समाहृत्य अष्टचत्वारिंशत् अक्षराणि सन्ति। पादस्य अन्ते एव यतिः भवति। यतिः इत्युक्ते विरामः। इदं छन्दः तु वार्णिकच्छन्दः वर्तते।

उदाहरणे लक्षणसमन्वयः - भुजङ्गप्रयातवृत्तस्य उदाहरणं तावत्-

I ऽ ऽ, I ऽ ऽ, I ऽ ऽ , I ऽ ऽ/ I ऽ ऽ, I ऽ ऽ, I ऽ ऽ , I ऽ ऽ

पुरः सा-धुवद्भा-ति मिथ्या विनीतः-/ परोक्षे- करोत्य-र्थनाशं- हताशः।

I ऽ ऽ, I ऽ ऽ, I ऽ ऽ , I ऽ ऽ/ I ऽ ऽ, I ऽ ऽ, I ऽ ऽ , I ऽ ऽ

भुजङ्ग-प्रयातो-पमं य-स्य चित्तं-/, त्यजेत्ता-दृशं दु-श्चरित्रं- कुमित्रम्॥ इति

प्रकृतश्लोकस्य अस्यप्रति चरणं चत्वारः यगणाः सन्ति। पादान्ते यतिः अपि वर्तते। अत एव श्लोकः अयं भुजङ्गप्रयातस्य उदाहरणत्वेन गण्यो भवति इति। इदं समवृत्तं विद्यते। अत एव पादचतुष्टयम् अपि समलक्षणयुक्तं भवति। एवञ्च अस्य श्लोकस्य एकस्मिन् पादे द्वादश अक्षराणि विद्यन्ते। प्रकृतश्लोकस्य पादचतुष्टयं समाहृत्य अष्टचत्वारिंशत् अक्षराणि सन्ति।

२४.२.९) वसन्ततिलका

काव्यजगति अत्यन्तं प्रसिद्धं वृत्तं वसन्ततिलका। प्रायः सर्वे एव कवयः अनेन वृत्तेन काव्यं रचयितुम् अधिकतया इच्छन्ति। इदं वृत्तं अत्यन्तं श्रुतिमधुरं भवति। वसन्ततिलकावृत्तेन रचिताः श्लोकाः काव्यस्य अधिकं सौन्दर्यं वर्धयन्ति।

लक्षणम् - वसन्ततिलकावृत्तस्य लक्षणम्- "उक्ता वसन्ततिलका तभजा जगौ गः" इति।

व्याख्यानम् - इयं च वसन्ततिलका शक्वर्याः कश्चित् भागः वर्तते। वसन्ततिलकानामकं वृत्तम् उक्तम् अस्ति। तत् कीदृशम् इति। यस्य वृत्तस्य प्रति चरणं तभजाः इत्युक्ते तगण-भगण-जगणाः, जगौ इत्युक्ते जगणः गुरुश्च, गः इत्युक्ते गुरुः अस्ति चेत् तद् वृत्तं वसन्ततिलका इति नाम्ना प्रख्यातम् अस्ति। अर्थात् यस्य वृत्तस्य प्रति चरणं क्रमेण तगणः, भगणः, जगणः , पुनः जगणः वर्तन्ते, ततःपरं गुरुवर्णः भवति, ततश्च पुनः गुरुवर्णः भवति चेत् तद् वृत्तं वसन्ततिलका इति नाम्ना कथितं भवति। अस्य च वृत्तस्य पादान्ते यतिः विद्यते। इदम् अपि समवृत्तं भवति। अतः अस्य अपि पादचतुष्टयं समलक्षणयुक्तं भवति। अस्य वृत्तस्य एकस्मिन् एव चरणे चतुर्दश अक्षराणि विद्यन्ते। एवञ्च पादचतुष्टयम् आहृत्य षट्पञ्चाशत् अक्षराणि विद्यन्ते। अस्य एव वृत्तस्य पादान्ते यतिः विद्यते। यतिः इत्युक्ते विरामः इत्यर्थः। अर्थात् अस्मिन् वृत्ते तु पादस्य अन्ते एव विरामो भवति।

उदाहरणे लक्षणसमन्वयः - वसन्ततिलकावृत्तस्य उदाहरणं तावत्-

ऽ ऽ ।, ऽ।।, ।ऽ ।,।ऽ।,ऽऽ/ ऽऽ।, ऽ।।, ।ऽ ।,।ऽ।,ऽऽ

फुल्लं व-सन्तति-लकं ति-लकं व-नाल्याः, लीलाप-रं पिक-कुलं क-लमत्र रौति।

ऽ ऽ।, ऽ।।, ।ऽ।,।ऽ।,ऽऽ/ ऽऽ ।,ऽ ।।,।ऽ ।, ।ऽ।,ऽ

वात्येष- पुष्पसु-रभिर्म-लयाद्रि-वातो, यातो ह- रिः स म-धुरां वि-धिना ह-ताः

ऽ

स्मः॥ इति।

प्रकृतश्लोकस्य अस्य प्रति चरणं क्रमेण तगणः, भगणः, जगणः, पुनः जगणः वर्तते। ततःपरं गुरुस्वरयुक्ताक्षरद्वयं वर्तते। अत एव प्रकृतश्लोकः वसन्ततिलकावृत्तस्य उदाहरणत्वेन गृहीतो भवति। इदम् अपि समवृत्तं भवति। अत एव पादचतुष्टयम् अपि समलक्षणयुक्तं भवति। श्लोकस्य अस्य प्रति चरणं चतुर्दश अक्षराणि विद्यन्ते। प्रकृतश्लोके षट्पञ्चाशत् अक्षराणि विद्यन्ते। एवञ्च अस्य श्लोकस्य पादान्ते यतिः विद्यते।

नामान्तरम् - वसन्ततिलकायाः बहु नामान्तरं विद्यते। अत्र काचित् कारिका उपलभ्यते -

"सिंहोन्नतेयमुदिता मुनिकाश्यपेन।

उद्धर्षिणीति गदिता मुनिसैतवेन।

रामेण सेयमुदिता मधुमाधवीति॥"इति।

अर्थात् वसन्ततिलकायाः काश्यपमते सिंहोन्नता इति नाम, सैवतस्य मते उद्धर्षिणी इति नाम, रामस्य मते तु माधवी इति नाम। वसन्ततिलकावृत्तस्य नामान्तरम् एव ज्ञात्वा अवगन्तुं शक्यते कियती प्रसिद्धिः आसीत्।

२४.२.१०) मालिनी

लक्षणम् - मालिनीच्छन्दसः लक्षणम्- "ननमयययुतेयं, मालिनी भोगिलोकैः" इति।

व्याख्यानम् - इदं च वृत्तम् अतिशक्वर्याः कश्चित् भागः वर्तते। ननमयययुता इत्युक्ते नगणद्वयेन, मगणेन, यगणद्वयेन, युता- युक्ता भवति चेत् सा मालिनी भवति इत्यर्थः। अर्थात् यस्य वृत्तस्य प्रति चरणं क्रमेण नगणः, पुनः नगणः वर्तते, ततःपरं सर्वगुरुः मगणः वर्तते, ततःपरं यगणः, ततःपरं पुनः यगणः भवति चेत् तत् वृत्तं मालिनी इति नाम्ना प्रख्यातम् अस्ति। एवञ्च भोगिः इत्युक्ते अष्टौ इत्यर्थः, लोकः इत्युक्ते सप्त इत्यर्थः। अत एव अष्टमे अक्षरे ततःपरं सप्तमे अक्षरे च यतिः भवति। इदम् अपि समवृत्तं भवति। अतः पादचतुष्टयम् अपि समलक्षणयुक्तं भवेत्। अस्य वृत्तस्य एकस्मिन् एव पादे पञ्चदश अक्षराणि विद्यन्ते। अतः श्लोके अस्मिन् षष्टिः अक्षराणि सन्ति।

उदाहरणे लक्षणसमन्वयः - मालिनीवृत्तस्य उदाहरणं तावत्-

।।।, ।।।, ऽऽ ऽ,।ऽऽ,।ऽऽ/।।।, ।।।, ऽऽ ऽ,।ऽऽ, ।ऽऽ

अतिवि-पुलल-लाटं, पी-वरोरः-कपाटं, सुधटि-तदश-नोष्ठं व्या-घ्रतुल्य-प्रकोष्ठम्।

।।। , ।।। , ऽ ऽ ऽ,। ऽ ऽ,। ऽ ऽ / ।।। , ।।। , ऽ ऽ ऽ,। ऽ ऽ, । ऽ ऽ

पुरुष-मशनि-लेखाल-क्ष्मणं वी-रलक्ष्मी-रतिसु-रभिय-शोभिर्मा-लिनी वाभ्युपैति॥ इति।

प्रकृतश्लोकस्य प्रत्येकं चरणेषु आदौ नगणः, ततःपरं पुनः नगणः वर्तते, ततःपरं सर्वगुरुः मगणः वर्तते, ततःपरं यगणः ततःपरं पुनः यगणः भवति। एवञ्च अष्टभ्यः अक्षरेभ्यः परं यतिः अस्ति। एवञ्च ततःपरम् अपि सप्तभ्यः अक्षरेभ्यः परं पुनः यतिः दृश्यते। अत एव श्लोकः अयं मालिनीवृत्तस्य उदाहरणत्वेन गण्यते। प्रकृतश्लोकस्य एकस्मिन् एव पादे पञ्चदश अक्षराणि विद्यन्ते। अतः श्लोके अस्मिन् षष्टिः अक्षराणि सन्ति। समवृत्तं छन्दः अस्ति। अत एव पादचतुष्टयम् अपि समलक्षणयुक्तं भवति।

२४.२.११) शिखरिणी

लक्षणम् - शिखरिणीवृत्तस्य लक्षणम् - “रसैः रुद्रैश्छिन्ना यमनसभलागः शिखरिणी” इति।

व्याख्यानम् - अत्यष्ट्याः छन्दसः कश्चित् भागः शिखरिणी। यस्य वृत्तस्य प्रति चरणं यमनसभलाः इत्युक्ते यगणः, मगणः, नगणः, सगणः, भगणः, लघुश्च, गः - गुरुश्च वर्तन्ते चेत् तद् वृत्तं शिखरिणी इति नाम्ना प्रख्यातं भवति। रसैः इत्युक्ते षड्भिः, रुद्रैः इत्युक्ते एकादशभिः, छिन्ना - यतिमती सा शिखरिणी भवति। अर्थात् यस्य वृत्तस्यप्रति चरणं क्रमेण यगणः, मगणः, नगणः, सगणः, भगणः, लघुः, गुरुश्च वर्तन्ते चेत् तस्य वृत्तस्य शिखरिणी इति नाम भवति। एवञ्च षड्भ्यः अक्षरेभ्यः परम् एकादशभ्यः अक्षरेभ्यः परं च यतिः भवति। इदम् अपि समवृत्तम् अस्ति। अतः पादचतुष्टयम् अपि समलक्षणयुक्तं भवेत्। अस्य वृत्तस्य एकस्मिन् एव पादे सप्तदश अक्षराणि विद्यन्ते। अतः वृत्ते अस्मिन् अष्टषष्टिः अक्षराणि सन्ति।

उदाहरणे लक्षणसमन्वयः - शिखरिणीवृत्तस्य उदाहरणं तावत्-

। ऽ ऽ, ऽ ऽ ऽ, ।।। ,।। ऽ, ऽ ।। ,। ऽ

यदा कि-ञ्चिद्ज्ञोऽहं-, द्विप इ-व मदा-न्धः समभवम्।

। ऽ ऽ, ऽ ऽ ऽ, ।।। ,।। ऽ, ऽ।। ,। ऽ

तदा स-र्वज्ञोऽस्मी-, त्यभव-दवलि-प्तं मम मनः।

। ऽ ऽ, ऽ ऽ ऽ, ।।। , ।। ऽ, ऽ।। ,। ऽ

यदा किं-चित् किंचित्- बुधज-नसका-शादव-गतम्

। ऽ ऽ, ऽ ऽ ऽ,।।। ,।। ऽ, ऽ ।। ,। ऽ

तदा मू-र्खोऽस्मी-ति, ज्वर इ-व मदो- मे व्यप-गतः॥ इति।

प्रकृतश्लोकस्य अस्य प्रति चरणं क्रमेण यगणः, मगणः, नगणः, सगणः, भगणः, लघुः, गुरुश्च वर्तन्ते। अतः शिखरिणी इति वृत्तस्य उदाहरणत्वेन श्लोकः अयं गण्यो भवति। एवञ्च षड्भ्यः अक्षरेभ्यः परम् यतिः विद्यते। पुनश्च ततःपरं एकादशभ्यः अक्षरेभ्यः परं च यतिः भवति। इदम् अपि समवृत्तम्

अस्ति। अतः पादचतुष्टयम् अपि समलक्षणयुक्तं भवति। अस्य श्लोकस्य एकस्मिन् एव पादे सप्तदश अक्षराणि विद्यन्ते। अतः सम्पूर्णश्लोके अस्मिन् अष्टषष्टिः अक्षराणि सन्ति।

२४.२.१२) मन्दाक्रान्ता

लक्षणम् - मन्दाक्रान्ताच्छन्दसः लक्षणम्- “मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद् गुरू चेत्॥”इति।

व्याख्यानम् - मन्दाक्रान्तावृत्तम् अत्यष्ट्याः छन्दसः कश्चित् भागः विद्यते। तस्य लक्षणं कथयति - यस्य वृत्तस्य प्रति चरणं क्रमेण म्भौ इत्युक्ते मगणः भगणः च भवतः, ततःपरं नतौ इत्युक्ते नगणः तगणश्च भवतः, ततःपरं तात् तगणात् परं गुरुवर्णद्वयं च भवेत् चेत् तदा मन्दाक्रान्ता इति नाम भवति। अर्थात् यस्य वृत्तस्य प्रति चरणं आदौ मगणः ततःपरं भगणः वर्तते, ततःपरं नगणः ततःपरं तगणः, ततःपरं पुनः तगणः वर्तते, तस्मात् द्वितीयतगणात् च परं गुरुस्वरयुक्ताक्षरद्वयं च वर्तते, तदा तस्य वृत्तस्य मन्दाक्रान्ता इति नाम। अधुना यतिनियमं कथयति - जलधिषडगैः इति। छन्दःशास्त्रे जलधिः इत्युक्ते चत्वारः, अगैः इत्युक्ते सप्तभिः इति। अर्थात् चतुर्भ्यः अक्षरेभ्यः परं यतिः भवति। ततः षड्भ्यः अक्षरेभ्यः परं यतिः वर्तते। ततः सप्तभ्यः अक्षरेभ्यः परं यतिनियमः विद्यते। इदम् अपि समवृत्तम् अस्ति। अतः पादचतुष्टयम् अपि समलक्षणयुक्तं भवेत्। अस्य वृत्तस्य एकस्मिन् एव पादे सप्तदश अक्षराणि विद्यन्ते। अतः वृत्ते अस्मिन् अष्टषष्टिः अक्षराणि सन्ति।

उदाहरणे लक्षणसमन्वयः - मन्दाक्रान्तावृत्तस्य उदाहरणं तावत्-

ऽ ऽ ऽ, ऽ।।,।।।,ऽ ऽ।, ऽ ऽ।,ऽऽ

कश्चित्का-न्ताविर-हगुरु-णा स्वाधि-कारात्प्र-मत्तः।

ऽ ऽऽ, ऽ।।,।।।,ऽ ऽ।,ऽ ऽ।,ऽऽ

शापेना-स्तङ्गमि-तमहि-मा वर्ष-भोग्येण- भर्तुः।

ऽऽऽ, ऽ।।,।।।,ऽ ऽ।, ऽऽ।,ऽऽ

यक्षश्च-क्रे जन-कतन-यास्नान-पूर्णोद-केषु।

ऽ ऽ ऽ, ऽ।।,।।।,ऽ ऽ।,ऽ ऽ।,ऽऽ

स्निग्धच्छा-यातरु-षु वस-तिं राम-गिर्याश्र-मेषु॥

प्रकृतश्लोकस्य अस्य प्रति चरणम् क्रमशः मगणः भगणः, नगणः, तगणः , पुनः तगणः च वर्तन्ते। तस्मात् च द्वितीयतगणात् च परं गुरुस्वरयुक्ताक्षरद्वयं च वर्तते। अत एव तस्य वृत्तस्य मन्दाक्रान्ता इति नाम। पुनश्च चतुर्भ्यः अक्षरेभ्यः परं यतिः भवति। पुनः ततः षड्भ्यः अक्षरेभ्यः परं यतिः विद्यते। ततः पुनः सप्तभ्यः अक्षरेभ्यः परं यतिः विद्यते। अत एव अयं श्लोकः मन्दाक्रान्तावृत्तस्य उदाहरणत्वेन गण्यो भवति। इदम् अपि समवृत्तम् अस्ति। अतः पादचतुष्टयम् अपि समलक्षणयुक्तं भवेत्। अस्य श्लोकस्य एकस्मिन् एव पादे सप्तदश अक्षराणि विद्यन्ते। अतः श्लोके अस्मिन् अष्टषष्टिः अक्षराणि सन्ति।

२४.२.१३) शार्दूलविक्रीडितम्

काव्यमार्गेषु अत्यन्तं प्रसिद्धतं छन्दः भवति शार्दूलविक्रीडितम्। संस्कृतजगति अनेन छन्दसा अगणिताः श्लोकाः सन्ति। सम्प्रति तस्य वृत्तस्य लक्षणादिकं विचार्यते।

लक्षणम्- शार्दूलविक्रीडितस्य वृत्तस्य लक्षणानि वक्ष्यन्ते- "सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्"इति।

व्याख्यानम् - इदं वृत्तम् अतिधृत्याः कश्चित् भागः विद्यते। यस्यप्रति चरणं सगुरवः इत्युक्ते गुरुणा एकेन सहिताः, मसजस्तताः - मगणः, सगणः, जगणः, सगणः, तगणद्वयं च स्युः। पुनश्च सूर्यैः इत्युक्ते द्वादशभिः, अश्वैः इत्युक्ते सप्तभिः यतिः भवति। तस्य वृत्तस्य नाम शार्दूलविक्रीडितम् इति। अर्थात् यस्य च वृत्तस्यप्रति चरणं क्रमेण मगणः, सगणः, जगणः, पुनः सगणः, ततःपरं तगणद्वयं च स्युः। एवञ्च द्वादशभ्यः अक्षरेभ्यः परं यतिः भवति। पुनश्च ततः सप्तभ्यः अक्षरेभ्यः परं यतिः भवति। तस्य वृत्तस्य शार्दूलविक्रीडितम् इति नाम। इदम् अपि समवृत्तं भवति। अतः पादचतुष्टयम् अपि समलक्षणयुक्तं भवेत्। अस्य श्लोकस्य एकस्मिन् एव पादे नवदश अक्षराणि विद्यन्ते। अतः सम्पूर्णश्लोके अस्मिन् षट्सप्ततिः अक्षराणि सन्ति।

उदाहरणे लक्षणसमन्वयः - शार्दूलविक्रीडितवृत्तस्य उदाहरणं तावत्-

ऽ ऽऽ ,।। ऽ,। ऽ । ,।। ऽ, ऽ ऽ । ,ऽ ऽ। , ऽ

या कुन्दे-न्दुतुषा-रहार-धवला- या शुभ्र-वस्त्रावृ-ता।

ऽ ऽऽ ,।। ऽ, । ऽ । ,।। ऽ, ऽ ऽ । ,ऽ ऽ। , ऽ

या वीणा-वरद-ण्डमण्डि-तकरा- या श्वेत-पद्मास-ना।

ऽ ऽऽ ,।। ऽ,। ऽ। ,।। ऽ, ऽ ऽ। , ऽ ऽ । , ऽ

या ब्रह्मा-च्युतश-ङ्करप्र-भृतिभि-र्देवैः स-दा वन्दिता।

ऽ ऽ ऽ ,।। ऽ,। ऽ । ,।। ऽ, ऽ ऽ। , ऽ ऽ । , ऽ

सा मां पा-तु सर-स्वती भ-गवती- निःशेष-जाड्या-पहा॥ इति।

प्रकृतश्लोकस्य अस्यप्रति चरणं क्रमेण मगणः, सगणः, जगणः, पुनः सगणः, ततःपरं तगणद्वयं च सन्ति। एवञ्च द्वादशभ्यः अक्षरेभ्यः परं यतिः भवति। पुनश्च ततः सप्तभ्यः अक्षरेभ्यः परं यतिः भवति। अत एव अयम् एव श्लोकः शार्दूलविक्रीडितस्य वृत्तस्य उदाहरणत्वेन गृहीतो भवति। इदम् अपि समवृत्तं भवति। अतः पादचतुष्टयम् अपि समलक्षणयुक्तं भवति। अस्य श्लोकस्य एकस्मिन् एव पादे नवदश अक्षराणि विद्यन्ते। अतः सम्पूर्णश्लोके अस्मिन् षट्सप्ततिः अक्षराणि सन्ति। इदं च वार्णिकच्छन्दः भवति।

पाठगतप्रश्नाः-४

अत्र केचित् पाठगताः प्रश्नाः प्रदीयन्ते -

२३. भुजङ्गप्रयातवृत्तस्य लक्षणं किम् अस्ति।

२४. भुजङ्गप्रयातवृत्तेन रचिते श्लोके कति अक्षराणि सन्ति।

२५. वसन्ततिलकावृत्तस्य लक्षणं किम् अस्ति।

२६. वसन्ततिलकावृत्तस्य प्रत्येकं पादेषु कति अक्षराणि सन्ति।

२७. काश्यपमते वसन्ततिलकायाः अपरं नाम किम् अस्ति।

२८. मालिनीवृत्तस्य लक्षणं किम् अस्ति।

२९. मालिनीवृत्तस्य प्रत्येकं पादेषु कति अक्षराणि सन्ति।

३०. शिखरिणीवृत्तस्य लक्षणं किम् अस्ति।

३१. शिखरिणीवृत्तस्य प्रत्येकं पादेषु कति अक्षराणि सन्ति।

३२. मन्दाक्रान्तावृत्तस्य लक्षणं किम् अस्ति।

३३. शार्दूलविक्रीडितवृत्तस्य लक्षणं किम् अस्ति।

पाठसारः

संस्कृतसाहित्यजगति छन्दसः प्रचुरं प्रयोगः दृश्यते। शाकुन्तलादिलौकिककाव्ये वैदिकसाहित्ये च छन्दसः प्रयोगः अस्ति एव। अस्मिन् पाठे आर्यावृत्तरूपस्य मात्रिकच्छन्दसः वर्णना क्रियते। आर्याच्छन्दसः लक्षणविचारः, उदाहरणम्, यतिनियमश्च उच्यते। मात्रिकच्छन्दं वर्णयित्वा अत्यन्तं प्रसिद्धम् इन्द्रवज्रावृत्तम् उपेन्द्रवज्रावृत्तञ्च वर्णयति। यस्य वृत्तस्यप्रति चरणं तगणद्वयम्, जगणेन साकं गुरुद्वयं च भवति चेत् अस्य वृत्तस्य इन्द्रवज्रा इति नाम भविष्यति। अस्य पादान्ते यतिः भवति। एवञ्च उपेन्द्रवज्रावृत्ते प्रथमं जगणः वर्तते, ततःपरं तगणः वर्तते, ततःपरं पुनः जगणः वर्तते। ततःपरं परं गुरुस्वरविशिष्टाक्षरद्वयं वर्तते। एवञ्च पादस्य अन्ते एव यतिः भवति। शालिनीच्छन्दसः प्रत्येकं चरणेषु प्रथमं मगणः ततःपरं तगणः ततःपरं पुनः तगणः ततःपरं गुरुवर्णः ततःपरं पुनः गुरुवर्णः भवति चेत् शालिनीवृत्तम् इति नाम भवति। चतुर्भ्यः अक्षरेभ्यः परं सप्तभ्यः अक्षरेभ्यः परं च यतिः भवति। ततःपरं रथोद्धतावृत्तम् आलोचयति। रथोद्धताच्छन्दसः प्रत्येकं पादेषु रगणात् परं नगणः रगणश्च वर्तते। एवञ्च लघुगुरू च स्याताम्। एवञ्च पादस्य अन्ते एव यतिनियमो भवति। पुनश्च वंशस्थस्य लक्षणं कथयति - यस्य वृत्तस्य प्रत्येकं पादेषु जगणः, ततःपरं तगणः,ततश्च पुनः जगणः, ततःपरं रगणः च क्रमेण वर्तन्ते चेत् तद् वंशस्थम्। तोटकवृत्तस्य लक्षणं भवति - यस्य च वृत्तस्य प्रत्येकं पादेषु चत्वारः सगणाः वर्तन्ते चेत् तत् वृत्तं तोटकम् इति नाम्ना प्रथितम्। तोटकवृत्तस्यापि पादान्ते यतिः भवति। सम्प्रति

द्रुतविलम्बितस्य लक्षणं कथयति - यस्य वृत्तस्य प्रतिपदे आदौ नगणः भवति, ततःपरं भगणः भवति, ततःपरं पुनः भगणः भवति, ततःपरं रगणः भवति चेत् तत् वृत्तं द्रुतविलम्बितम् इति नाम्ना काव्यजगति प्रथितं भवति। पुनः यस्य वृत्तस्यप्रति चरणं चतुर्भिः यगणैः युक्तं स्यात्, तस्य वृत्तस्य भुजङ्गप्रयातम् इति नाम्ना प्रख्यातम्। अस्य अपि वृत्तस्य पादान्ते यतिः भवति। पुनः यस्य वृत्तस्य प्रत्येकं चरणेषु आदौ तगणः वर्तते, ततःपरं भगणः वर्तते, ततःपरं जगणः अस्ति, ततश्च पुनः जगणः वर्तते, ततःपरं गुरुवर्णः भवति, ततश्च पुनः गुरुवर्णः भवति चेत् तद् वृत्तं वसन्ततिलका इति नाम्ना कथितं भवति। अस्य च वृत्तस्य पादान्ते यतिः विद्यते। ततःपरं मालिनीवृत्तस्य लक्षणं कथयति - यस्य वृत्तस्य प्रत्येकं चरणेषु आदौ नगणः, ततःपरं पुनः नगणः वर्तते, ततःपरं सर्वगुरुः मगणः वर्तते, ततःपरं यगणः ततःपरं पुनः यगणः भवति चेत् तत् वृत्तं मालिनी इति नाम्ना प्रख्यातम् अस्ति। यस्य वृत्तस्यप्रति चरणं क्रमेण यगणः, मगणः, नगणः, सगणः, भगणः, लघुः, गुरुश्च वर्तन्ते चेत् तस्य वृत्तस्य शिखरिणी इति नाम भवति। एवञ्च षड्भ्यः अक्षरेभ्यः परम् एकादशभ्यः अक्षरेभ्यः परं च यतिः भवति। एवञ्च यस्य वृत्तस्य प्रति चरणं आदौ मगणः ततःपरं भगणः वर्तते, ततःपरं नगणः ततःपरं तगणः, ततःपरं पुनः तगणः वर्तते, तस्मात् द्वितीयतगणात् च परं गुरुस्वरयुक्ताक्षरद्वयं च वर्तते, तदा तस्य वृत्तस्य मन्दाक्रान्ता इति नाम। यस्य च वृत्तस्यप्रति चरणं क्रमेण मगणः, सगणः, जगणः, पुनः सगणः, ततःपरं तगणद्वयं वा स्युः। एवञ्च द्वादशभ्यः अक्षरेभ्यः परं यतिः भवति। पुनश्च ततःपरं सप्तभ्यः अक्षरेभ्यः परं यतिः भवति। तस्य वृत्तस्य शार्दूलविक्रीडितम् इति नाम स्यात्। एवञ्च एतानि छन्दांसि समासेन प्रकृतपाठे चर्चितानि सन्ति।

पाठान्तप्रश्नाः

अत्र केचित् पाठान्तप्रश्नाः प्रदीयन्ते -

१. उदाहरणपुरःसरम् आर्याच्छन्दसं वर्णयत।

२. इन्द्रवज्रावृत्तस्य लक्षणम् उदाहरणञ्च लिखत।

३. उपेन्द्रवज्रावृत्तस्य लक्षणम् उदाहरणञ्च लिखत।

४. शालिनीवृत्तस्य लक्षणम् उदाहरणञ्च लिखत।

५. रथोद्धतावृत्तस्य लक्षणम् उदाहरणञ्च लिखत।

६. वंशस्थवृत्तस्य लक्षणम् उदाहरणञ्च लिखत।

७. तोटकवृत्तस्य लक्षणम् उदाहरणञ्च लिखत।

८. भुजङ्गप्रयातवृत्तस्य लक्षणम् उदाहरणञ्च लिखत।

९. वसन्ततिलकावृत्तस्य लक्षणम् उदाहरणञ्च लिखत।

१०. द्रुतविलम्बितवृत्तस्य लक्षणम् उदाहरणञ्च लिखत।

११. मालिनीवृत्तस्य लक्षणम् उदाहरणञ्च लिखत।

१२. शिखरिणीवृत्तस्य लक्षणम् उदाहरणञ्च लिखत।

१३. मन्दाक्रान्तावृत्तस्य लक्षणम् उदाहरणञ्च लिखत।

१४. शार्दूलविक्रीडितवृत्तस्य लक्षणम् उदाहरणञ्च लिखत।

पाठान्तप्रश्नानाम् उत्तराणि

अत्र पाठान्तप्रश्नानाम् उत्तराणि प्रदीयन्ते -

१. मात्रिकच्छन्दः।

२. जगणः।

३. विषमवृत्तम्।

४. त्रिंशत्।

५. सप्तविंशतिः।

६. "स्यादिन्द्रवज्रा यदि तौ जगौ गः" इति।

७. एकादश।

८. समवृत्तम्।

९. "उपेन्द्रवज्रा जतजास्ततो गौ"इति।

१०. एकादश।

११. "शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः" इति।

१२. एकादश।

१३. "रान्नराविह रथोद्धता लगौ"इति।

१४. चतुश्चत्वारिंशत्।

१५. पादान्ते।

१६. " जतौ तु वंशस्थमुदीरितं जरौ"इति।

१७. द्वादश।

१८. " इह तोटकमम्बुधिसैः प्रथितम्" इति।

१९. द्वादश।

२०. "द्रुतविलम्बितमाह नभौ भरौ"इति।

२१. पादान्ते।

२२. सुन्दरी।

२३. "भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः। "इति।

२४. अष्टचत्वारिंशत्।

२५. "उक्ता वसन्ततिलका तभजा जगौ गः" इति।

२६. चतुर्दश।

२७. सिंहोन्नता।

२८. "ननमयययुतेयं, मालिनी भोगिलोकैः" इति।

२९. पञ्चदश।

३०. "रसैः रुद्रैश्छिन्ना यमनसभलागः शिखरिणी" इति।

३१. सप्तदश।

३२. "मन्दाक्रान्ता जलधिषडगैम्भौ नतौ ताद् गुरू चेत्॥"इति।

३३. "सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्"इति।

॥ इति चतुर्विंशः पाठः ॥